Q6HGIH

## सप्तदशः पाठः

# महात्मागाँधी

महात्मागाँधी एकः महापुरुषः आसीत्। सः भारताय अजीवत्। भारताय एव च प्राणान् अत्यजत्। अस्य पूर्णं नाम मोहनदासकर्मचन्द–गाँधी अस्ति।

अस्य जन्म १८६९ तमे खीस्ताब्दे अक्टूबर– मासस्य द्वितीयायां तिथौ 'पोरबन्दर' नाम्नि स्थाने अभवत्। तस्य पितुः नाम कर्मचन्दगाँधी मातुश्च पुतलीबाई आसीत्। तस्य पत्नी कस्तूरबा धार्मिका पतिव्रतानारी आसीत्।



बाल्यकालादेव गाँधी एकः सरलः बालकः आसीत्। सः सदा सत्यं वदति स्म। सः आचार्याणां प्रियः आसीत्।उच्चशिक्षायै सः आंग्लदेशमगच्छत्। विदेशगमनसमये मातुः आज्ञायाः सः संकल्पितवान् यत् अहं मद्यं न सेविष्ये, मांसस्पर्शमपि न करिष्यामि एवं सदा ब्रह्मचर्यम् आचरिष्यामि। स्वदेशमागत्य सः देशस्य सेवायाम् संलग्नः अभवत्। अस्य ईश्वरे दृढः विश्वासः आसीत्। सः आङ्गलशासकानां विरोधे सत्याग्रहान्दोलनम् प्रावर्तयत्। तस्य श्रद्धा अहिंसायाम् आसीत्। तस्य सर्वः समयः, सर्वा शक्तिः, सर्वम् धनम् च देशाय एवासीत्।

सः देशभक्तानां नायकः आसीत्। सः भारतस्य स्वातंत्र्यार्थम् (स्वतंत्रतायै) आन्दोलनम् प्रारभत्। "आङ्गलीयाः! भारतं त्यजत, इति तस्य घोषवाक्यम् आसीत्।" अस्य महापुरुषस्य प्रयत्नैः भारतं स्वतन्त्रम् अभवत्।

## शब्दार्थाः

अजीवत् = जीए। खीस्ताब्दे = ईस्वी सन् में। अभवत् = हुआ। श्रद्धा = विश्वास। देशभक्तानां=देशभक्तों के। आङ्गलीयाः! भारतं त्यजत = अंग्रेजों! भारत छोड़ो। प्रावर्तयत् = चलाया। अहिंसायाम् = अहिंसा में।

## अभ्यासः

**प्रश्न 1. निम्न प्रश्नों के उत्तर संस्कृत में दीजिए–**

(क) महात्मा गाँधिनः पूर्णं नाम किमस्ति ?

(ख) तस्य मातुः नाम लिखतु ?

(ग) तस्य जन्म कस्मिन् स्थाने अभवत् ?

(घ) महात्मा गाँधी उच्चशिक्षायै कुत्र अगच्छत्?

**प्रश्न 2. रिक्त स्थानों की पूर्ति कीजिए –**

(क) सः ............................................ प्रियः आसीत्।

(ख) ..................................... सदा सत्यं वदति स्म।

(ग) कर्मचन्द गाँधी तस्य ................................ नाम।

**प्रश्न 3. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए –**

(क) वह सदा सत्य बोलता था।

(ख) महात्मा गाँधी एक महापुरुष थे।

(ग) उसकी श्रद्धा अहिंसा में थी।

**प्रश्न 4.**

**क – निम्नलिखित पदों में सन्धि–विच्छेद कीजिए –**

(i) स्वदेशमागत्य (ii) मातुश्च।

**ख – निम्नलिखित पदों की सन्धि कीजिए –**

(i) देशम्+अगच्छत् (ii) स्वातंत्र्य+अर्थम्।

Q6RCKJ